# Shiva Puja with 32 parts Dvastrimshopachara pUjana

# શિવદ્વાત્રિંશોપચારપૂજન

## Document Information

Text title : Shiva Puja with 32 parts

File name : shivadvAtriMshopachArapUjana.itx

Category : shiva, pUjA

Location : doc_shiva

Proofread by : Sunder Hattangadi

Latest update : August 4, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

# શિવદ્વાત્રિંશોપચારપૂજન

૧ ધ્યાનમ્ –

ધ્યાયેન્નિત્યં મહેશં રજતગિરિનિભં ચારુચન્દ્રાવતંસં
રત્નાકલ્પોજ્જ્વલાઙ્ગં પરશુમૃગવરાભીતિહસ્તં પ્રસન્નમ્ ।
પદ્માસીનં સમન્તાત્ સ્તુતમમરગણૈર્વ્યાઘ્રકૃતિં વસાનં
વિશ્વાદ્યં વિશ્વવન્દ્યં નિખિલભયહરં પઞ્ચવક્ત્રં ત્રિનેત્રમ્ ॥

વન્દે દેવ ઉમાપતિં સુરગુરું વન્દે જગત્કારણં
વન્દે પન્નગભૂષણં મૃગધરં,વન્દે પશૂનાં પતિમ્ ।
વન્દે સૂર્યશશાઙ્કવહ્નિનયનં,વન્દે મુકુન્દપ્રિયં
વન્દે ભક્તજનાશ્રયં ચ વરદં,વન્દે શિવં શઙ્કરમ્ ॥

સિંહાસનં કનકરત્નમણિ પ્રભાસ્વત્
છત્રધ્વજા લસિત ચામર તોરણાઢ્યમ્ ।
બાલાર્ક કોટિ સદૃશં કનકામ્બરાઢ્યં
શ્રી વિશ્વનાથ તવ ધ્યાનપરં કરિષ્યે ॥

૨ આવાહનમ્ –

ગન્ધર્વ કિન્નર મહર્ષિ સુરેન્દ્રવૃન્દૈઃ
સંસેવ્યમાન મનિશં વૃષભાવરૂઢમ્ ।
આવાહયામિ ગિરિજાસહિતં પ્રસન્નં
ભક્ત્યા સુખાગતમહં શિરસા નમામિ ॥

૩ આસનમ્ –

સિંહાસનં કનકરત્ન મણિ- પ્રભાસ્વત્
છત્રધ્વજા લસિત ચામર તોરણાઢ્યમ્ ।
બાલાર્ક કોટિ સદૃશં કનકામ્બરાઢ્યં
શ્રી વિશ્વનાથ ! મનસૈવ મયાઽર્પિતં તે ॥

૪ પાદ્યમ્ –

દૂર્વાઙ્કુરામ્બુજ-મનોહર-પુષ્પયુક્તં
    શુદ્ધં જલં સુરભિ ચૂર્ણ-સમન્વિતં ચ ।
સૌવર્ણ-પાત્ર-વિલસત્ પદયોર્વિશુદ્ધં
    પાદ્યં ગૃહાણ જગદીશ મયાઽર્પિતં તે ॥

૫ અર્ઘ્યમ્ –

દુર્વાયવાક્ષત સુગન્ધિ હિરણ્ય રત્નં
    દર્ભામ્બુજં ત્રિપથગા જલ પુષ્પ યુક્તમ્ ।
સૌવર્ણ પાત્ર રચિતં ફલ યુક્તમર્ઘ્યં
    ત્વં સ્વીકુરુષ્વ મનસાર્પિતમિન્દુમૌલે ॥

૬-આચમનીયમ્ –

ગઙ્ગાજલૈરમૃત માધુરતામુપન્નૈ-
    રેલાલવિઙ્ગ શુભગન્ધ મનોભિરામમ્ ।
ગૌરીપતે કનકપાત્ર ધૃતં મયા તે
ભક્ત્યાર્પિતં સુચિરમાચમનં ગૃહાણ ॥

૭ સ્નાનમ્ –

દિવ્યદ્રુમેન્ધન- સમિધ્ધ - હુતાશનાગ્નૈઃ
    શુદ્ધોદકૈઃ સવિમલૈશ્ચ સમુદ્રજૈશ્ચ ।
ગૌરીપતે પરિગૃહાણ યથા સુખેન
    સ્નાનમ્મયૈવ વિધિના વિધિવત્ પ્રદિષ્ટમ્ ॥

૮ પયઃ સ્નાનમ્–

દિવ્યોષધિ દ્રવભવં નવનીતપૂર્ણં
    ક્ષીરાબ્ધિસમ્ભૃત સુધાધિકધામધારમ્ ।
સ્વર્ધેનુ સમ્ભવમપૂર્વ- સુમિષ્ઠમેતં
    સ્નાનાય શુદ્ધ મુરરીકુરુ દેવદુગ્ધમ્ ॥

૯ દધિ સ્નાનમ્ –

કર્પૂર-કુન્દ-કુમુદેન્દુ-કરાવદન્તં
    મલ્લિ પ્રફુલ્લ- કુસુમાકર- કાન્તિ કાન્તમ્ ।
સ્નાનાય શુદ્ધ રસરાજ સુકોમલાર્ચિઃ
    સ્નિગ્ધં શુભં દધિ દયાનિધયેઽર્પયામિ ॥

૧૦ ઘૃત સ્નાનમ્ –

તેજોમયેન તપન દ્યુતિપાવિતેન
    ગવ્યેન ભવ્ય વિવિધિના પરમન્ત્રિતેન ।
વહ્નૌ સૃતેન રચયામિ રસાવૃતેન
    ભૌમામૃતે ન ચ ધૃતેન તવાભિષેકમ્ ॥

૧૧ મધુ સ્નાનમ્ –
નાનાવિધૌષધિ લતા-રસ-સમ્ભૃતાન્તં
    માધુર્યમિષ્ટમમૃતં પ્રતિમં ગુણેન ।
માણિક્ય પાત્ર સમ પૂરિત ભક્તિ પૂર્ણ -
    મઙ્ગી કુરુષ્વ મધુ દેવ મહેશ શમ્ભો ॥

૧૨ શર્કરા સ્નાનમ્ –
પૂરણેક્ષુસાગર સમુદ્ર ભવ યાઽતિ નિમ્ના
    મુક્તાફલદ્રુમ- સુધાધિકયા મહિમ્ના ।
સર્વાઙ્ગ શોધનવિધૌ વરયા ત્રિનેત્ર
    સુસ્નાહિ સિદ્ધ વર શર્કરયા મહેશ ॥

૧૩ ગન્ધોદક સ્નાનમ્ –
કઙ્કોલ કુણ્ડ્મલ દલૈલ- લવઙ્ગ મિશ્રં
    જાતિફલા મધ -સુગન્ધિ સમન્વિતં ચ ।
કર્પૂર કેસર સુગન્ધિભિરિન્દુમૌલૈ
    સ્નાનાય શુદ્ધતરગન્ધમિદં ગૃહાણ ॥

૧૪ ઉદ્વર્તન સ્નાનમ્ –
જાતિજપા કનક પઙ્કજ મોગરાદ્યૈ-
    રન્યૈશ્ચ કાલ ભવ પુષ્પ સમન્વિતે ચ ।
ભક્ત્યા મયા સુમનસૈવ સુવાસિતં ચ
    ગૌરીપતે સુરભિ તૈલમિદં ગૃહાણ ॥

૧૫ શુદ્ધોદક સ્નાનમ્ –
શ્રી જાહ્નવી જલમયં સરસં સુધાવ-
    ચ્ચૈલા લવિઙ્ગ શુભગન્ધ મનોભિરામમ્ ॥

ગૌરીપતે કનકપાત્રધૃતં મયા તે
    સ્નાનં ગૃહાણ જગદીશ મયાઽર્પિતં તે ॥

૧૬ વસ્ત્રમ્ –

કૌશેય-વસ્ત્ર યુગલં કનકૈર્વિચિત્રં
    બાલાર્ક કોટિ સદૃશં ચ મનોભિરામમ્ ।
ભક્ત્યા મયાર્પિતમિદં પરિધાય શમ્ભો
    સિંહાસને ત્વમુપવિશ્ય ગૃહાણ પૂજામ્ ॥

૧૭ યજ્ઞોપવીતમ્ –
દત્તમ્મયા સુમનસા વચસા કરેણ
    યદ્ બ્રહ્મચર્યસમયં પરમં પવિત્રમ્ ।
યદ્ ધર્મકર્મ નિલયં પરમાયુષં ચ
    યજ્ઞોપવીત મુરરીકુરુ વિશ્વનાથ ॥

૧૮ ગન્ધમ્- ચન્દનમ્ –
યદ્ શ્રેષ્ઠમસ્તિ મલયાચલ ચન્દનાનાં
    કર્પૂર કેસર- સુગન્ધિ-રસેન ઘૃષ્ટમ્ ।
આમોદ -માન મનિશં મનસા ધૃતં ચ
    શ્રી ચન્દનં ત્વ મુરરી કુરુ દીનબન્ધો ॥

૧૯ અક્ષતાન્ –
શ્વેતેરખણ્ડિત-મનોહર શાલીબીજૈઃ
    સંક્ષાલિતૈઃ શુચિજલૈશ્ચ સુગન્ધિમિશ્રૈઃ ।
ત્વામર્ચયામિ ભગવન્ મનસા મહેશં
    ગૌરીપતે મયિ નિધેહિ કૃપાકટાક્ષ ॥

-૨૦ પુષ્પમ્ –
પુન્નાગ જાતિ બકુલાબ્જ રસાલ પુષ્પૈ-
    ર્બિલ્વ પ્રવાલૈસ્તુલસી સમન્વિતૈઃ ।
શ્રી પારિજાતાદિ- સમુદ્ ભવૈશ્ચ
    કરોમિ પૂજાં ભગવન્ ગૃહાણ ॥

૨૧ પુષ્પમાલા–
સેવન્તિકા- બકુલ ચમ્પક પાટલાબ્જૈઃ
    પુન્નાગ જાતિ-કરવીર- રસાલ પુષ્પૈઃ ।
બિલ્વ પ્રવાલ-તુલસીદલ-માલતીભિ
    સ્ત્વાં પૂજયામિ જગદીશ્વર મે પ્રસીદ ॥

૨૨ પરિમલ સૌભાગ્ય દ્રવ્ય –

શ્વેતાબિરેણ સહિતં શુભ રક્ત ચૂર્ણં
    સિન્દૂરચૂર્ણ વિપુલાન્વિત પીતચૂર્ણમ્ ।
કર્પૂર કેસર સુગન્ધિ સુવાસિતં ચ
    સૌભાગ્યચૂર્ણ મુરરીકુરુ દીનબન્ધો ॥

૨૩ ધૂપમ્ –
કાલાગરોશ્ચ ઘૃતમિશ્રિત ગુગ્ગુલસ્ય
    ધૂપો મયા વિરચિતો ભવતઃ પુરસ્તાત્ ।
આઘ્રાયતાં શુચિ મનોહર ગન્ધ પૂર્ણં
    તૂર્ણં વિનાશય મહેશ્વર મોહજાલમ્ ॥

૨૪ દીપમ્ –
પૂર્ણે ઘૃતેન ગિરિજેશ સુવર્ણપાત્રે
    કૌસુમ્ભ સૂત્ર- દ્રઢ વર્તિ વિરાજમાનઃ ॥

દીપઃ પુરસ્તવ મયા રચિતો ય એષ
    શીઘ્રં વિનાશયતુ મે દુરિતાન્ધકારમ્ ॥

૨૫ નૈવેદ્યમ્ –
જિહ્વા સુધા-કનકપાત્ર વિરાજમાનં
    મન્ત્રાદિકં મધુર શાક-ફલાવલીઢમ્ ।
પઞ્ચામૃત પ્લુતમનેકવિધં રસૌઘં
    સહ્રુલ્પિતં ત્વ મુરરીકુરુ દીનબન્ધો ॥

૨૬- મુખશુદ્ધ્યર્થે ફલં
કલિઙ્ગ કોશાતક સંયુતાનિ
    જમ્બીર નારિઙ્ગ- સમન્વિતાનિ ।
સુનારિકેલાનિ ચ દાડિમાનિ
ફલાનિ તે દેવ સમર્પયામિ ॥

૨૭ મુખવાસાર્થે તાબૂલમ્ –
પૂગૈઃ સ ચૂર્ણ ખદીરૈર્નવજાતિ પત્રૈ-
    ર્જાતિફલાદિક લવિઙ્ગ સમન્વિતૈશ્ચ ।
તામ્બૂલ વીટકમિદં મનસા ધૃતં યત્
    તત્ સ્વીકુરુ પ્રમથનાથ મહેશ શમ્ભો ॥

૨૮ દક્ષિણા –

વિભાવસોર્બીજમિદં હિરણ્યદ્રવ્યં
    દિવ્યં પ્રકાશં વિધિગર્ભ સંસ્થમ્ ।
ગૃહાણ ભૂતાધિપતે મહેશ
    મુદ્રાર્પણં વૈ મનસાર્પિતં તે ॥

૨૯ પ્રદક્ષિણામ્ –
પદે પદે યા પરિપૂજકેભ્યઃ
    સદ્યોશ્વમેધાદિ ફલં દદાતિ ।
તાં સર્વ પાપક્ષય હેતુભૂતાં,
    પ્રદક્ષિણાં મે પરિતઃ કરોમિ ॥

૩૦ મન્ત્ર પુષ્પાઞ્જલિમ્ –
ચરણકમલ યુગ્મં પઙ્કજૈઃ પૂજયિત્વા
    કનકકમલમાલાં કણ્ઠદેશેઽર્પયિત્વા ।
શિરસિ વિનિહિતોયં મન્ત્રપુષ્પાઞ્જલિસ્તે
    હૃદયકમલમધ્યે દેવ હર્ષં તનોતુ ॥

૩૧ નમસ્કારઃ –
શાન્તં પદ્માસનસ્થં શશિધરમુકુટં પઞ્ચવક્ત્રં ત્રિનેત્રં
    શૂલં વજ્રં ચ ખડ્ગં પરશુમભયદં દક્ષિણાઙ્ગે વહન્તમ્ ।
નાગં પાશં ચ ઘણ્ટાં ડમરુકસહિતં ચાઙ્કુશં વામભાગે
    નાનાલઙ્કારયુક્તં સ્ફટિકમણિનિભં પાર્વતીશં નમામિ ॥

પીઠં યસ્યાઃ ધરિત્રી જલધરકલશા લિઙ્ગમાકાશમૂર્તિઃ
    નક્ષત્રં પુષ્પમાલા ગ્રહગણકુસુમં નેત્રચન્દ્રાર્કવહ્નિઃ ।
કુક્ષૌ સપ્તસમુદ્રં ભુજગિરિશિખરં સપ્તપાતાલપાદં
    વેદં વક્ત્રં ષડઙ્ગં દશદિશિવસનં દિવ્યલિઙ્ગં નમામિ ॥

પાતાલે ચાન્તરિક્ષે દશદિશિવદને સર્વશૈલે સમુદ્રે ।
ભસ્મે કાષ્ઠે ચ લોષ્ઠે ક્ષિતિ જલપવને સ્થાવરે જઙ્ગમેવા ॥

બીજે સર્વૌષધિનાં અસુરસુરપતૌ પુષ્પપત્રે તૃણાગ્રે ।
એકો વ્યાપી શિવોઽહમિતિ વદતિ હરિર્નાસ્તિ દેવો દ્વિતીયઃ ॥

કણ્ઠે યસ્ય વિરાજતે હિ ગરલં શીર્ષે ચ મન્દાકિની
    વામાઙ્કે ગિરિજાનનં કટિતટે શાર્દૂલચર્મામ્બરમ્ ।
માયા યસ્ય રુણાદ્ધિ વિશ્વમખિલં તસ્મૈ નમઃ શમ્ભવે

જમ્ભુવજ્જલબિન્દુવજ્જલજવજ્જમ્બાલવજ્જાલવત્ ॥

શિવં શાન્તં શુદ્ધં પ્રકટમકલઙ્કં શ્રુતિતનું
મહેશાનં શમ્ભું સકલસુરસંસેવ્યચરણમ્ ।
ગિરીશં ગૌરીશં ભવભયહરં નિષ્કલમજં
મહાદેવં વન્દે પ્રણત જનતાપોપશમનમ્ ॥

ગિરીશં ગણેશં ગલે નીલવર્ણં
ગજેન્દ્રાધિરૂઢં ગુણાતીતરૂપમ્ ।
ભવં ભાસ્વરં ભસ્મના ભૂષિતાઙ્ગં
ભવાની કલત્રં ભજે પઞ્ચવક્ત્રમ્ ॥

૩૨ ક્ષમાપના –
કરચરણકૃતં વાક્કાયજં કર્મજં વા
શ્રવણનયનજં વા માનસં વાઽપરાધમ્ ।
વિહિતમવિહિતં વા સર્વમેતત્ ક્ષમસ્વ
જય જય કરુણાબ્ધે શ્રીમહાદેવ શમ્ભો ॥

Proofread by Sunder Hattangadi

*Shiva Puja with 32 parts Dvastrimshopachara pUjana*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*